| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | कृष्णसर्पवधे तीक्ष्णाग्रलौहकीलिकादानमादौ कर्त्तव्यम्। सर्पजातीयषण्ढवधे पलालभारः सीसकमाषश्च दातव्यः। एतज्ज्ञानतः। एतदशक्तौ व्रतादिकं कर्त्तव्यम्। | | | |
| अथ सामान्यपक्षिवधः। | नक्तव्रतम्। त्रिरक्तिपरिमितरौप्यदानं वा। | ० | ⁄१३।— पणौ। नक्तव्रतस्योपवासतृतीयभागत्वात्। | यथाशक्ति। |
| | कामतोऽत्यन्ताभ्यासे शूद्रहत्याव्रतम्। गुरुगोवधव्रतं वा। स्त्रीशूद्रबालवृद्धानामर्द्धम्। एकस्य स्त्रीत्वाद्युभयधर्म्मवत्त्वे पादः। | १२ धेनवः। | ३६ कार्षापणाः। | ७ गावः। अशक्तौ ६।० कार्षापणाः। |
| अथ विशेषपक्षिवधः। | अहोरात्रोपवासः सर्वबीजदानञ्च। एतदज्ञानविषयम्। | ० | उपवासानुकल्पः ॥० पणाः। सर्व्वबीजमूल्यम् ।० पणाः। | यथाशक्ति। |
| बकबलाका-हंससारसकारण्डवचक्रवाककुररगृध्रश्येनखञ्जरीटटिट्टिभोलूक-शुकशारिकातित्तिरिमयूरकाककलविङ्कालञ्जकमद्गुकपोतपारावतादीनां वधः। | ज्ञानकृते त्र्यहोपवासः। अशक्तस्य गोदानम्। तत्रायं विशेषः। शुकवधे द्विहायनगवदानम्। क्रौञ्चवधे त्रिहायणगवदानम्। क्रौञ्चशुकभासमयूरश्येनगृध्रवधे वत्सतरीदानम्। अत्र वृषदानवत्सतरीदानयोर्व्यवस्था शक्ताशक्तविषयिका। एतद्दानाशक्तानां व्रतादिकम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| कोकिलशुककपोतकपिञ्जलकुक्कुटटिट्टिभखर्ज्जूरखञ्जरीटानां पुरुषभारपरिमितानां वधः। | उत्कृष्टशूद्रहत्याव्रतम्। | १५ धेनवः। | ४५कार्षापणाः। | ८ गावः। अशक्तौ ८।⁄६॥ कार्षापणाः। |
| मत्स्यमण्डूकमकरशिशुमारादिजलचरवधः। | सप्तरात्रब्रह्महत्याव्रतम्। एतदज्ञानतः सकृद्वधे। | ० | १ कार्षापणः। | ⁄११॥—पणौ। |
| | अहोरात्रोपवासः यथाशक्तिलवणदानञ्च। एतत् कामतः सकृत्। अभ्यासात्यन्ताभ्यासयोस्तु मत्स्यवधप्रायश्चित्ते दर्शयिष्यते। | ० | ॥० पणाः उपवासानुकल्पः। १॥०कार्षापणः। लवणमूल्यम्।२। | ।⁄३॥=पणाः। |
| अथ सास्थ्यनस्थिप्राणिवधः। | | | | |
| सहस्रसंख्यकानां अस्थिमतां कृकलासादीनां ज्ञानकृतवधः। | आब्दिकं शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्। | १५ धेनवः। | ४५ कार्षापणाः। | ८ गावः। अशक्तौ ८।⁄६॥ कार्षापणाः। |
| अनस्थ्नां क्रमिकीटपतङ्गभ्रमरदंशमशकमक्षिकादीनां शकटपूरितमितानां ज्ञानकृतवधः। | आब्दिक शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्। | १५ धेनवः। | ४५ कार्षापणाः। | ८ गावः। अशक्तौ ८।⁄६॥ कार्षापणाः। |
| अस्थिमतां प्रत्येकं वधः। | पणदानम्। | ० | ० | यत्किञ्चित्। |
| अनस्थ्नां प्रत्येकं वधः। | प्राणायामः। पणदानं वा। | ० | ० | तथा। |
| अन्नशक्रादिगुड़ादिसर्वरसफलपुष्पजातप्राणिवधः। | दिनमेकं घृतमात्रभोजनम्। एतदज्ञाने ज्ञाने तद्द्विगुणम्। | ० | ॥० पणाः। | यथाशक्ति। |
| | अभ्यासे तप्तकृच्छ्रम्। | ४ धेनवः। | ११।० कार्षापणाः। | यथाशक्ति। |
| | अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्। | ६ धेनवः। | १८कार्षापणाः। | यथाशक्ति। |
| फलवद्वृक्षलतागुल्मच्छेदनम्। | प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |